**व्रश्च** छेदे तु॰पर॰सक॰ऊदित् वेट्। वृश्चति अव्रश्चीत् अव्राक्षीत्।

**व्रश्चन** पु॰ वृश्च्यतेऽनेन व्रश्च-ल्यु। (छेनि) १स्वर्णादिच्छेदनार्थे अस्त्रभेदे अमरः। भावे ल्युट्। २छेदने न॰ अमरः।

**व्रात** पु॰ वृ-अतच् पृषो॰। समूहे अमरः।

**व्रातीन** त्रि॰ व्रातेन चरति ख। संघजीविनि। "व्रातीनव्यालदीप्रास्त्रैः" भट्टिः।

**व्रात्य** पु॰ व्रातात् समूहात् च्यवति यत्। अव्यवहार्य्ये, संस्कारहीने, जातिमात्रोपजीविनि, "अत ऊर्द्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्या भवन्त्यार्य्यविगर्हिताः" मनुः। तत्र प्रायश्चित्तं मिता॰ उक्तं यथा तत्र व्रात्यतायां मनुनेदमुक्तम् "येषां द्विजानां सावित्री नानूच्येत यथाविधि। तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेदिति"। यत्तु यमेनोक्तम् "सावित्रीपतिता यस्य दश वर्षाणि पञ्च च। सशिखं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः। एकविंशतिरात्रञ्च पिबेत् प्रसृतियावकम्। हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च वा। ततो यावकशुद्धस्य तस्योपनयनं स्मृतम्" इति। तदुभयमपि याज्ञवल्कीयमासपयोव्रतविषयम्। यत्तु वशिष्ठेनोक्तम् "पतितसावित्रीक उद्दालकव्रतञ्चरेत्। द्वौ मासौ यावकेन वर्त्तयेन्मासं पयसा पक्षमामिक्षयाष्टरात्रं घृतेन षड्रात्रमयाचितेन त्रिरात्रमवभक्षोऽहोरात्रमुपवसेदश्वमेधावभृथङ्गच्छेद्व्रात्यस्तोमेन वा यजेतेति"। तत्रेयं व्यवस्था यस्योपनयने आपद्भावेन तत्कालातिक्रमस्तस्य याज्ञवल्कीयव्रतानामन्यतमत् शक्त्यपेक्षया भवति अनापदतिक्रमे तु मानवं त्रैमासिकम्। तत्रैव पञ्चदशवर्षादूर्द्ध्वमपि कियत्कालातिक्रमे तूद्दालकव्रतम् व्रात्यस्तोमो वेति। येषान्तु पित्रादयोऽप्यनुपनीतास्तेषामापस्तम्बोक्तम् "यस्य पिता पितामहावनुपनीतौ स्यातान्तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्य्यम्। यस्य प्रपितामहादेर्नानुस्मर्यते उपनयनन्तस्य द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्य्यमिति"।

**व्रात्यस्तोम** पु॰ व्रात्ययोग्यः स्तोमः। यज्ञभेदे "स च यज्ञश्चतुर्विधः" कात्या॰ श्रौ॰ २२।४।१ सूत्रादौ दर्शितो यथा

"व्रात्यस्तोमाश्चत्वारः" सू॰ "व्रात्यस्तोमसंज्ञकाश्चत्वारः क्रतवो भवन्ति व्रात्याः प्रसिद्धा एव त्रिपुरुषं पतितसावित्रीकाः। प्रायश्चित्तार्थत्वाच्च लौकिकेऽग्नौ भवन्ति न स्मार्त्तैराधानं प्रयुज्यते अतदङ्गत्वात् तदुक्तमाचार्य्येण स्थपतीष्टिं प्रकृत्य लौकिक इति। "द्वितीय उक्थ्यः" सू॰ "व्रात्यगणस्य ये सम्पादयेयुस्ते प्रथमेन यजेरन्" सू॰ सम्पादनं च गायननर्त्तकादीनाम् तेषां प्रथमेऽधिकारः। ये व्रात्या नृत्यगीतवाद्यशस्त्रधारणादौ स्वयं प्रवीणाः सन्त उपदेष्टारो भूत्वा स्वां विद्यां व्रात्यसमूहस्य सम्पादयेयुः शिक्षेयुः पाठयेयुः ते प्रथमेन यजेरन्। "द्वितीयेन निन्दिता नृशंसाः" सू॰। नृशंसत्वेन ये निन्दितास्तेषां द्वितीयेऽधिकारः" सं॰। ये नृशंसा निन्दितान्दभिमनुष्यैरभिशंसनेन पापाध्यारोपणेन निन्दिताः गर्हिताः ज्ञातिभिर्बहिष्कृताः ते द्वितीयेन यजेरन्" कर्कः "तृतीयेन कनिष्ठाः" सू॰ कनिष्ठाः लघवः। "ज्येष्ठाश्चतुर्थेन" सू॰ अधिक्रियन्ते। ज्येष्ठशब्दार्थमाह "अपेतप्रजननास्थविरास्तदाख्यास्तेषां ये नृशंसतमः स्याद्‌द्रव्यवत्तमो वानूचानतमो वा तस्य गार्हपत्ये दीक्षेरन्" सू॰। "स गृहपतिः कर्त्तव्यः" कं॰। अपगतप्रजननेन्द्रियसामर्थ्या यौवनापगमे। निर्वीर्य्यप्रजनाः स्थविरा वृद्धास्तदाख्याः। नृशंसतमः अत्यन्तं क्रूरकर्मा" भा॰। [अव्रैषीत्।

**व्री** वृतौ क्र्या॰ प्वा॰ पर॰ सक॰ अनिट्। व्रि(व्री)णाति

**व्री** गतौ दिवा॰ आ॰सक॰ अनिट्। व्रीयते अव्रेष्ट। ओदित् व्रीणः। [अव्रीडिष्ट।

**व्रीड़** क्षेपे दिवा॰ पर॰ सक॰ लज्जायां अक॰ सेट्। व्रीड्यति

**व्रीड़** पु॰व्रीड़-घञ्। लज्जायाम्। अ। तत्रैव स्त्री अमरः।

**व्रीस** वधे वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰ सेट्। व्रीसयति ते व्रीसति।

**व्रीहि** पु॰ व्री-हि किच्च। १धान्यभेदे २आशुधान्ये च अमरः। तद्भेदादिकं भावप्र॰ उक्तं यथा

"वार्षिकाः कण्डिताः शुक्ला व्रीहयश्चिरपाकिणः। कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि। शालामुखो जतुमुख इत्याद्याः व्रीहयः स्मृताः। कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः। पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते। कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते। शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते। लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः। व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिताः। अल्पाभिष्यन्दिनो बद्धवर्च्चस्काः षष्टिकैः समाः। कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे"। ततः अस्त्यर्थे व्रीह्या॰ इनिठनौ। व्रीहिन् व्रीहिक तद्विशिष्टे त्रि॰ बिल्वा॰ पुरोडाशभिन्ने अवयवार्थे अण्। व्रैह तदवयवे।